
ISSN 2320-4117

# रसधुनी

प्रथमसश्रिका षाण्मासिकी

## साहितीशोधपत्रिका




साहित्यविभागः

## राष्ट्रियसंस्कृतविद्यापीठम्

(विश्वविद्यालयानुदानायोगस्य १९५६ धारायास्तृतीयानुभागेन स्थापितः विश्वविद्यालयः)

तिरुपतिः - २०१२

Scanned by CamScanner

Rashtriya Sanskrit Vidyapeetha Series No. 275
ISSN 2320 -4117

# RASADHUNĪ

**Sāhitīśodhapatrikā - Prathamasañcikā-Ṣāṇmāsikī**

**Chief Patron**
**Prajnanavachaspati Janaki Ballav Patnaik**
**His Excellency Governor, Assam & Chancellor**

**Chief Editor**
**Prof. Hare Krishna Satapthy**
**Vice-Chancellor**

**Editor**
**Prof. G.S.R.Krishna Murty**
**Head, Department of Sahitya**

**RASHTRIYA SANSKRIT VIDYAPEETHA**
(University established under section 3 of UGC Act, 1956)
TIRUPATI - 517 507 (ANDHRA PRADESH)
2012

Scanned by CamScanner

27. छविलालसूरिप्रणीते सुन्दरचरितनाटके अलङ्काराणां प्रयोग: पालेटि नागेश्वरराव:, 103-104
28. विद्यामाधवानुसारं किरातार्जुनीयनायकत्वविचार:देवव्रत वेरा 104-105
29. अभिनवकाव्यशास्त्रदिशा भक्तिरसविमर्श: अविनाशगायेन 105-107
30. भासरूपकेषु नारीचित्रणे पद्मावतीचरित्रचित्रणम् पम्पा रानी गिरि 107-109
31. शृङ्गारलहरी अवधानुल रवितेजा: 109-110
32. श्रीरामभद्रदीक्षितविरचिते जानकीपरिणयनाटके रसौचित्यम् शिवगणेश: नागोतु 111-113
33. कृष्णविरचितनलोदयव्याख्याने अलङ्कारविन्यास: बि.बालशिवकुमार: 114-115
34. अनुमरणखण्डनम् पावनी 116-118
35. छन्दसां षट्प्रत्ययविन्यास: डा. के . सुजनि 119-123
36. रघुवंशमाधारीकृत्य पूज्यानां पूजाक्रमनिरूपणम् डा. वि.सूर्यप्रभा 123-125
37. वरदाभ्युदयचम्पूकाव्ये रसालङ्कारयो: निरूपणम् डा. सुजाता मुनुकुट्ल 125-127
38.श्रीमद्भागवतपुराणे प्रतीकचित्रणम् डा. षेक् जरीना बेगम् 127-131
39.विशाखदत्तस्य लोकोक्तिसङ्ग्रहः जे.वि.एस्.सीतारामाञ्जनेयशर्मा 132-135
40.भट्टिमहाकवे: काव्यस्य च वैशिष्ट्यम् के.कल्याणी 135-137
41.श्रीमदप्पय्यदीक्षितानां पद्यव्याख्यानकौशलम् डा. बि. कामाक्षम्मा 137-140
42.रसस्वरूपम् प्रद्युतकुमारदास: 141-142
43.रामायणम् पि.मधुसूदनन् 142-143
44.काव्यस्यात्मा ध्वनि: सस्मिता साहू 143-145
45.शब्दशक्तय: सूर्यपवनकुमार: हेच् 145-147
46.न शब्दार्थौ काव्यम् वि.लोहिता 147-148
47.एको रस: करुण एव के. श्रीचन्दना 149
48.रीतिरात्मा काव्यस्य टि.लावण्या 150-151
49.उपसर्जनीकृतस्व: कादम्बिनीमिश्र,टि.सन्ध्या 152
50.रस: काव्यात्मा जि.यशोदाकृष्ण: 153-154
51.गद्यकाव्यपरामर्श: सस्मिता साहु 154-155
52.रमणीयार्थप्रतिपादक: टि.एस्. दुर्गेश्वरी 155-156
53.तात्पर्यवाद: डि. अशोकबाबु, 156-157
54.आदिकाव्यम् उपजीव्यम् सि.एच्. स्रवन्ती 157-159
55.शब्द: अनुपादेय: के.अमरनाथ: 159-160
56.गुणविवेचनम् के.श्रीलक्ष्मी: 160-162
57.रसप्रतीति: टि.पि.गोपालकृष्ण: 163
58.अभिधावाद: के.हरिकृष्ण: 164-165
59.अनुमानं न व्यञ्जनापूरकम् डि.शिवप्रसादबाबु:, 165-166

***

Scanned by CamScanner

# अनुमरणखण्डनम्

पावनी
प्रकल्पसहायिका

स्त्रीणां जीवनं कै: अपि साङ्घिकै: कौटुम्बिकैश्च कारणै: बलात् अपह्रियते। तासां प्राणाश्च त्याज्याश्च भवन्ति। अद्य स्त्रीणां विवाहादिकरणं व्ययभरितं क्लेशकरमिति हेतो: गर्भस्था: स्त्रीशिशव: हन्यन्ते। तथाविधो दुराचार: भारतकाले न दृश्यते स्म। एवं स्त्रीणां जीवनविषये सुरक्षाधिकार: महाभारतकाले, अद्यतनकाले इव दत्त एव। यत: वर: कन्यां स्वयं प्रार्थयते स्म याचितायैव कन्या देया इति महाभारते स्पष्टमुक्तम्।

**अयाचितानि देयानि सर्वद्रव्याणि भारत।**
**अन्नं विद्या च कन्या च अनर्थिभ्यो न दीयते।** विदुरनीतौ ।

क्वचित् अद्यतनकाले अननुमोदितापि कन्या धनार्थम् अङ्गीक्रियते। सा हिंस्यते च। एवंविधो दुराचार: महाभारते कुत्रचित् नासीत्। न केवलं भारतकाले अस्मिन्नपि शतके पञ्चाशद्वर्षेभ्य: न दृष्ट इति वदन्ति। अद्यतनकाले अन्यो दुराचार: श्रूयते। यदा बन्धुभि: अदत्तां स्वयं वर: वृणुते तदा सा वर: कुलेन अयोग्यश्चेत् सा हन्यते। विशेषत: उत्तरदेशे एष आचार: द्वित्रा: अनुष्ठिता: इति वार्तापत्रिकासु दृष्टा:। नाम यशसे, प्रतिष्ठायै वा वध: इति प्रचारे दृश्यते। एवंविधजीवनाधिकारस्य उल्लङ्घनं महाभारते न कुत्रचित्र दृश्यते।

द्रौपद्या: स्वयंवरसन्दर्भे अर्जुन: मत्स्ययन्त्रं भित्वा द्रौपदीं जिगाय। तदानीन्तनकाले ब्राह्मणस्य स्वयंवराधिकार: नासीत्। ततो राजान: समेत्य एवं वदन्ति एषा राज्ञ: सर्वान् अस्मान् परिभाव्य ब्राह्मणं वृतवती। ब्राह्मणार्थे वयं सर्वं त्यजाम:। तथापि अनया ब्राह्मणस्य भयात् लोभात् वा एवं कृतं स्यात्। द्रुपद:, द्रौपदी च अत्र दोषभाजौ। ब्राह्मणं त्यक्त्वा सपुत्रं द्रुपदं हत्वा कन्यां गृह्णीम:। अथवा अस्मासु अन्यतमं न कश्चित् वरीष्यति तदा एनाम् अग्नौ क्षिपाम: इति। एतद् राज्ञां वच: स्त्रीजीविताधिकारापहारकमेव। किन्तु पूर्वपक्षतया ग्राह्यम्।

**अथवा यदि कन्येयं नेह कश्चिद्बुभूषति।**
**अग्नावेनां परिक्षिप्य याम राष्ट्राणि पार्थिवा:।।** (आदि. 180 अ. 7श्लो)

एवं महाभारते स्त्रीणां स्वयं जीविते अधिकार: अव्याहत: एव। तथापि स्त्रीजीविते एष पालक: सहगमनरूप: आचार: तत्र तत्र महाभारते श्लाघित: दृश्यते। यदि भर्ता केनापि कारणेन म्रियते तमनुसृत्य भार्याऽपि आत्मन: प्राणान् त्यजेत् इति। एष आचार: ऐच्छिक:, एकान्तिको वा इति निश्चयकरणं महाभारतम् आधारीकृत्य वक्तुं न शक्यते। तथापि ऐच्छिक एवेति मृते भर्तरि जीवितानां स्त्रियां वृत्तान्तेन स्पष्टं भवति। सहगमनरूप: आचार: आदिपर्वणि यथा -

**संसरन्तमपि प्रेतं विषमेष्वेकपातितम्।**
**भार्यैवान्वेति भर्तारं सततं या पतिव्रता।।**
**प्रथमं संस्थिता भार्या पतिं प्रेत्य प्रतीक्षते।**
**पूर्वं मृतं च भर्तारं पश्चात्साध्व्यनुगच्छति।।**



Scanned by CamScanner

**एतस्मात्कारणाद्राजन्पाणिग्रहणमिष्यते।**
**यदाप्नोति पतिर्भार्यामिह लोके परत्र च।।**

प्रथमं मृता भार्या स्वर्गे भर्तारं प्रतीक्षते। यदि भर्ता पूर्वं मृतो भवति पतिव्रता पश्चात् तमनुगच्छति। एतस्मात् कारणात् पाणिग्रहणम् अग्निसाक्षिकम् इष्यते इति। इदं च श्लोकत्रयं सहगमनविषयकमेव। न तयोः लोकान्तरगमने पौर्वापर्येऽपि अन्यतरः पूर्वगतं प्रतिपादयतीति।

संसरन्तं प्रेतम् अनुगच्छतीति सहगमनस्यैव समर्थनम्। पाणिगृहीती संसरता भर्त्रा पाणी गृहीत्वा आकृष्यते इति तात्पर्यम्। पौर्वापर्ये अन्योन्यसमागमः अत्र निर्दिष्टः। तथापि शान्तिपर्वणि कपोतोपाख्याने अपि पत्या सहगमनं बहुधा प्रशस्तम्। (शान्ति.143 अ.) शरणागतरक्षणप्राशस्त्यं, गृहस्थाश्रमप्राशस्त्यं कपोतदम्पतीनां कथा वर्णिता। भार्यायाः स्थानमपि बहुधा निरूपितम्। तथापि तस्योपाख्यानस्य समापने सहगमनमपि सर्वोत्तममुक्तम्। उपाख्यानान्ते सहगमनफलम् एकस्मिन् श्लोके दर्शितम्।

**एवं खलु कपोतस्य कपोती च पतिव्रता**
**लुब्धकेन सह स्वर्गं गताः पुण्येन कर्मणा।**
**याऽपि चैवंविधा नारी भर्तारमनुवर्तते**
**विराजते हि सा क्षिप्रं कपोतीव दिवि स्थिता।।**

एवं प्रशस्तेऽपि अयमाचारः महाभारते सर्वाभिः नानुसृतः। याश्च जीवितुम् अशक्ताः, ता एव स्वयं प्राणान् सहगमनेन न तत्यजुः। एका माद्री एवं कृतभर्तृसहगमना महाभारते दृश्यते।

पाण्डौ मृते कुन्ती, माद्री च बहु रुदतः। तदा कुन्ती अहं ज्येष्ठा, भर्तुः अनुगमनं करिष्यामि त्वं बालकान् रक्ष इति माद्रीं जगाद। माद्री च तन्नाङ्गीकृतवती। भर्ता मामभिगम्यैव निधनं गतः, आवयोः सुतेषु अहं निर्विशेषं छेत्तुम् असमर्था, अतोऽहमेव भर्तारमनुगच्छामीति वदति।

महाभारते याः स्त्रियः सहगमनमकृत्वा भर्तृणां ऋणं कर्तव्यं च समापितम् अकुर्वन् तासां कथाः अपि बहवः दृश्यन्ते। अत एव बाणभट्टः कादम्बर्यां सहगमनदुराचारं तिरस्कुर्वन् महाभारतमेव प्रमाणीकृत्य जीवन्तीनां जीवनस्य सार्थक्यं निरूपितवान्।

अत्र सहगमनम् अकृत्वा याः स्त्रियः धृतजीविताः ताः बहूपकारं मृतानाम् अनन्तरवंश्यानां च कृतवत्यः।

1. पाण्डोः मरणानन्तरं कुन्ती प्रायशः शतं वर्षाणि जीवितवती। आत्मानम् अत्यक्त्वा सा कुरुवंशस्य महोपकारं कृतवती। शतशृङ्गात् पाण्डवान् आदाय धृतराष्ट्राय निवेदितवती। तत एव पाण्डवाः द्रोणात् अधिगतविद्याः उत्तमाः राजानः, क्षत्रियाश्च बभूवुः। इन्द्रप्रस्थराज्यलाभानन्तरं स्वर्गस्थितःपाण्डु राजसूयं कर्तुमियेष हरिश्चन्द्रादीन् दृष्ट्वा स्वेनापि तथाविधं फलं भोज्यं मेने। पाण्डोः सन्देशमादाय नारदः सभापर्वणः आदौ युधिष्ठिरं राजसूयकरणार्थम् आदिदेश। युधिष्ठिरोऽपि पाण्डोः वाक्यं पालयितुमेव राजसूयेन इष्टवान्। एवं कुन्त्याः जीवनेनैव पाण्डोः वाञ्छा पूर्णा। अपि च पाण्डवानां राज्ये नष्टे तत्सम्पादनाय कृष्णदौत्यानन्तरं पाण्डवान् बोधितवती। धर्मराजपट्टाभिषेकानन्तरम् एकविंशतिवर्षाणि राजमाता भूत्वा धृतराष्ट्रगान्धारीभ्यां सार्धं वनं गत्वा तौ सेवित्वा दावाग्नौ शरीरं त्यक्तवती। एवं कुन्त्याः जीवनमेव भरतवंशस्य जीवनहेतुरभूत्।



Scanned by CamScanner

2. उत्तरा - विराटस्य दुहिता, अर्जुनपुत्रस्य अभिमन्योः पत्नी, महाभारतसङ्ग्रामे द्रोणपर्वणि चतुर्दशे दिवसे चक्रव्यूहे षड्भिः महारथैः निरायुधः मारितः। तथापि उत्तरा जीवितं धृतवती। अभिमन्योः मरणकाले उत्तरा अन्तर्वत्नी आसीत्। सौप्तिकपर्वणि उपपाण्डवानां वधानन्तरम् अश्वत्थामा पलायितः व्यासाश्रमं जगाम। सर्वपाण्डवगर्भनाशार्थम् अश्वत्थामा ब्रह्मशिरोनामकास्त्रं प्रयुक्तवान्। अर्जुनोऽपि तदस्त्रं प्रयुज्य देवप्रार्थनेन उपसंहृतवान्। अश्वत्थामा उपसंहारं न जानाति। अतः तदस्त्रं सर्वान् पाण्डवगर्भान् ददाह। एवं कुरुवंशः निर्मूलितः। तदानीम् उत्तराप्रलापोपजनितकृपः श्रीकृष्णः गर्भे दग्धं शिशुं जीवयामास। अतः सः शिशुः विष्णुरातः, परीक्षित् इति नामाभ्यां प्रसिद्धः। परीक्षित् पुत्रः जनमेजयः एवम् उत्तरायाः जीवितेनैव कुरुवंशः रक्षितः।

3. दुःशला - सिन्धुराजस्य जयद्रथस्य पत्नी। दुर्योधनादिभ्रातृशतस्य एकैव भगिनी। सैन्धवः जयद्रथः प्रतिज्ञापूर्वकं द्रोणपर्वणि अर्जुनेन हतः। तदानीं सैन्धवपौत्रं हन्तुमुद्यतम् अर्जुनमनुनीय रक्षितवती। प्रतीपमतिं स्वपौत्रं हितमुक्त्वा वंशं च रक्षितवती। एवं दुःशलायाः आत्मप्राणत्यागः सहगमने न कृत इति हेतोरेव पुनः सैन्धववंशः जीवितः।

4. सत्यवती - शन्तनोरनन्तरं सा प्राणान् सहगमनेन न तत्याज। भीष्मं बोधयित्वा पुनः कुरुवंशस्थापनमपि तयैव कृतम्। यदि सत्यवती सहगमनं कृतवती तदा कुरुवंशनाशः तदानीमेव भवेदेव। एतदपि भीष्मवाक्येषु स्पष्टम्।

**मया च सत्यवत्या च कृष्णेन च महात्मना।**
**पुनरावर्जितं भूयो युष्मासु कुलतन्तुषु।।** आदि. 103अ. 3श्लो

शन्तनोरनन्तरं सा बहुवर्षाणि जीवनं कृतवती। चित्राङ्गद- विचित्रवीर्ययोः मृतयोरपि सा पाण्डोः राज्याभिषेकपर्यन्तं जीवितवती। आगामिनं वंशनाशं सत्यवती द्रष्टुं न शक्नोतीत्याशयेन भगवान् व्यासः ताम् एवं बोधयामास।

**अतिक्रान्तसुखाः कालाः प्रत्युपस्थितदारुणाः।**
**श्वश्वः पापीयदिवसाः पृथिवी गतयौवना।।** आदि.127अ. 6श्लो

सत्यवत्याः दृष्टान्तः महाभारते न वर्णितः।

अम्बिकाम्बालिके विचित्रवीर्यमरणानन्तरं न अनुमरणां कृतवत्यौ । धृतप्राणाभ्यामेव धृतराष्ट्र, पाण्डुराजौ जातौ। ततः कुरुवंशः रक्षितः।

स्त्रीपर्वणि नष्टभर्तृकाः स्त्रियः प्राणान् तत्यजुः इति कापि कथा महाभारते न दृश्यते। अतः सहगमनम् आचाररूपेण गृहीतमिति महाभारतकाले न सार्वजनीनतया अनुष्ठितम् इति वक्तुं शक्यते।

***



Scanned by CamScanner